International Journal of Sanskrit Research 2019; 5(3): 65-68

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 65-68
© 2019 IJSR
www.anantaajournal.com
Received: 07-03-2019
Accepted: 09-04-2019

**डॉ. बहुरन सिंह पटेल**
सहा.प्रा. शा संस्कृत महा रायपुर, छत्तीसगढ़, भारत

**Correspondence**
**डॉ. बहुरन सिंह पटेल**
सहा.प्रा. शा संस्कृत महा रायपुर, (छ ग), भारत

# आधुनिकसंस्कृतसाहित्ये ललितकला

**डॉ. बहुरन सिंह पटेल**

**प्रस्तावना**

कल् गतिसंख्यानयोः [1] भ्वादिगण कल् गतौ संख्याने [2] चुरादिगण कलनम् इति कला भावार्थे धञ् टाप् कं सुखं लातीति कला। अत्र संख्याने ख्या धातु न प्रयुज्यते प्रत्युत् चक्षिङ् व्यक्तायां वाचि, स्पश्टकथनं, प्रकटनम्। आचार्य भरतमुनिना स्वकीये नाट्यषास्त्रे उक्तम्– न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला। नासौ योगो न तत्कर्म नाट्येऽस्मिन्यन्न दृष्यते [3] आचार्यभामहेन स्वकीये काव्यालंकारे उक्तम्–धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च [4] अपि च– नृत्यगीत प्रभृतयः कला कामार्थ संश्रयाः [5]। भारते काव्यसंगीतवास्तु कलात्रयं परब्रह्मणं प्रकटयितुं स्वीक्रियते। नाटयं काव्यस्य अंषमेकं।काव्यं उत्कृश्टाकला काव्यस्य उत्कृश्टतः रुपं नाटकं इति मालविकाग्निमित्रे प्राप्यते।

अव्याजसुन्दरीं तां विधानेन ललितेन योजयता।
परिकल्पितो विधात्रा वाणः कामस्य विशदिग्धः।। [6]
विश्रान्तिर्यस्य सम्भोगे सा कला न कला मता।
लीयते परमानन्दे ययात्मा सा परा कला।।

षक्तो मूकोऽपि यत् कर्तुं कलासंज्ञकस्तु तत् स्मृतम् [7] षुक्रनीति 4/3/25
कलायाः उन्नतिः सौन्दर्यबोधेन स्वीक्रियते। कला जनं व्यश्टितः समश्टिं प्रति उन्मुखीकरोति। काव्यसाहित्यस्य तथाच समस्त–
ललितकलानां आधारः सौन्दर्यमस्ति।धर्मकलयोः सदैवाभिन्न संबंधः भवति।विंष षताब्द्यां अनेके आचार्याः सवकायासु मौलिकरचनासु काव्यप्रयोजनविशयकं मौलिकचिन्तनमुस्थापितवन्तः। श्री कौत्सअप्पल्लसोमेश्वर षर्मा स्वकीये साहित्यविमर्षः इति ग्रन्थे केवलमानन्दानुभूतिमेव काव्यस्य प्रयोजनं स्वीकरोतिसः आनन्दस्य लौकिकालौकिकं द्विविधं रुपं प्रतिपादितवान् तत्राद्यः अनित्यः। द्वितीयस्तु काव्यगत–विभावानुभावव्यभिचार्यभियुक्तरत्यादिस्थाय्यात्मकरसास्वादजन्माब्रह्मानन्दसदृषे नित्यः। कविदृश्ट्या काव्यरचनं सप्रयोजनं निश्प्रयोजनञ्चेति द्विविधं प्रतिपादयता प्रो.रेवाप्रसादद्विवेदिना स्वीये काव्यालङ्कारिकाख्ये ग्रन्थे काव्यप्रयोजनं सम्यक् विचारितम्। तेनोक्तम् यत् किमपि प्रयोजनंमुद्दिष्य कविः काव्यं न रचयति अपितु यषःप्रभृतीनि प्रयोजनानि स्वाभाविकानि वर्तन्ते। यथा चटकः पक्षिविषेशः प्रभातसमये कणलाभेन कलरवं न करोति परन्त्वेश तस्य स्वाभाविकः धर्मः। एवमेव आदिकविःवाल्मीकिः धर्मार्थकाममाक्ष्प्राप्त्यर्थं रामायणं न रचितवान्। स तु लोकैशणा वितोशणा पुत्तैशणा इत्येताभ्यः पृथक् वीतरागः आसीत् अतः इदं सत्यं यत् रामायणस्य रचनायां वाल्मीकैः प्रवृत्तिः सप्रयोजनं नासीत्। प्रयोजनं कवेः काव्ये नापि किञ्चन दृष्यते।

चुङ्कृतौ कलविङ्कस्य यथा प्राभातिके क्षणें।।
एशणात्रितयोत्तीर्णे रामायणमहाकवौं।
आत्माविश्कारनैश्कर्म्यनैसर्गी किं प्रयोजनम्।
युगावष्यकतापूर्तिमन्त्रव्यतिरपि क्वचित्।
प्रयोजनं रघुव्यक्ती रघुवंषे यथा कवेः।
अधर्मोत्थानवेलायों धर्मरक्षापि दृष्यते।
काव्यार्थस्तुलसीकाव्ये यथा यवनषासने।

राश्ट्रदेवप्रबोधेऽपि विष्वदैवतसाक्षिका। [8] काव्यालङ्कारकारिका –तृतीयेऽधिकरणे

कविदृष्ट्या अस्मिन् विशये द्विवेदिमहोदयां कथनमिदं यत् मम्मटेन यानि काव्यप्रयोजनानि प्रतिपादितानि तान्यतिरिच्यापि काव्यस्यानेकानि प्रयोजनानि सम्भवन्ति। यथा युगाावष्यतापूर्तिः राश्ट्रदेवप्रबोधनं स्वधर्मरक्षणञ्चेत्यादीनि। अनेन प्रकारेण कवयः समाजस्य तात्कालिकसमस्यासमाधानाय रहस्याभिव्यक्तये च काव्ये रचयितुं प्रवृत्ताः भवन्ति। यस्मिन् काले वैदेषिकाः भारते आक्रमणं कृतवन्तः तस्मिन्नेव समये महाकविः कालिदासः रधुवंषमरचयत् ।यस्य प्रयोजनं रधुणा साम्यं कथं वयं प्राप्स्याम इति देषं प्रति सन्देषप्रदानम्। कुमारसंम्भवाभिज्ञानषकुन्तलादीनां प्रयोजनं वस्तुत इदमेव। तथैव यवनानां षासनसमये यदा हिन्दूधर्मः ह्नासोन्मुखः आसीत् तदा महात्मातुलसीदासः धर्मस्य रक्षणाय तस्य पुनरुत्थानाय च रामचरितमानसं रचितवान्। यत्र–तत्र राश्ट्ररुपदेवतानां प्रबोधेऽपि काव्यरचनायो प्रयोजनं भ्वति एव। अपि च–

न स्यात् प्रयोजनं स्याद् वा कवेः सामाजिकस्य तु।
मातृस्तन्यं यथा काव्यं हन्त सर्वार्थसाधनम्।।

स्वकीये काव्यसत्यालोके ग्रन्थे काव्यप्रयोजनं प्रतिपादयताऽऽचार्यब्रह्मानन्दषर्मणा रेवाप्रसादद्विवेदिमहोदयस्याभिमतं समर्थिम्। तेनोक्तम् यत् विशयविषेशं प्रति कवेः प्रवृत्तिः द्विविधा वर्त्तते स्वभावप्रेरिता प्रयोजनप्रेरिता चेति। वस्तुतः कवेः प्रवृत्तिरेव काव्यरुपं धारयतीति सत्यम्।अनया कविगतस्वभावप्ररितप्रवृत्या कविः सत्यस्याभिव्यक्तेष्च दर्षनं करोति। अनेन सुखसय प्राप्तिरवष्यमेव भवति सह्रदयगतप्रवृत्त्या सह्रदयोऽपि सुखमनुभवति।

प्रवृत्तिर्या कवेः सत्ये काव्ये सा परिवर्त्तते।
नात्र प्रयोजनं किञ्चित् स्वभावस्तु प्रवर्त्तते।।
प्रयोजनत्वमर्थादेः सम्भत्यत्र जातुचित्।
परं यातीह षैथिल्यं प्रवृत्तिः सा स्वभावजा।। [9]

स्वीये काव्यतत्त्वविवेक इति ग्रन्थे रमाषङ्रतिवारी महोदयेन कर्वेभावकस्य दृश्ट्या काव्यस्य प्रयोजनं प्रतिपादितम् श्रुतिप्रतिपादितं एशणात्रयं सांसारिकाणां कर्मणि प्रवृत्तिः आत्मोचलब्धिः जीवनबोधमित्यादित्यादिविशयकं ज्ञानं काव्यप्रयोजनरुपेण स स्वीकृतवान्।

अथ काव्यप्रयोजनं विचारणीयमधुना। भिन्नषः कवेर्भावकस्य च दृश्ट्या।

एशणात्रैविध्यं निगद्यते हि श्रुत्या। कर्मणि प्रवृत्तये तु सांसारिकाणाम्।।

रच्यते सुकविना ह्यात्मलब्धि हेतोः। न यषसे न ह्यर्थाय न चोर्ध्वगत्यै।।

ननु भावकाः संश्रयन्ति काव्यम्। न सद्यः परनिवृतये नाप्युपदेषहेतोः।। [10]

डॉ षङ्करदेव अवतरे स्वीये अभिनवकाव्यषास्त्रम् इति नाम्नि ग्रन्थे प्रमातृ–दृश्ट्या काव्यस्य द्विविधं प्रयोजनं प्रतिपादयति। तत्र प्रथमं जीवन्मुक्तिरिव सात्त्विकमानन्दम्। द्वितीयमाह्लादकरी षिक्षेति।

प्रमातुः स्थितिकोणेन काव्यस्य द्वे प्रयोजने।
जावनमुक्तिरिवाननदः सात्त्विको ह्यषिक्षणम्।।[11]

प्रो राधावल्लभत्रिपाठिना स्वकीयेऽभिनवकाव्यालङ्कारसूत्राख्ये ग्रन्थे मुक्तिः काव्यप्रयोजनरुपेण प्रतिपादितम्। सृश्टेष्चेनायाः तैविध्यत्वात् मुक्तिरपि त्रिधा विभज्यते इति तस्याषयः। आवरणभङमुक्तिः। आवरणं नाम सङ्कुचितप्रमातृत्वं कविः सह्रदयष्चात्र प्रमाता इति तेन प्रतिपादितम्। यथा आधिभौतिकमाधिदैविकमाध्यात्मिकञ्चेति भेदेन त्रिविधा सृश्टिः तथैव मुक्तिरपि आधिभौतिकी आधिदैविकी आध्यात्मिकी चेति त्रिधा। आधिभाभतिकमुक्तिदषायां सर्वे सुखं लभन्ते। षरीररक्षार्थंमन्नवस्त्रादीनां समुचिता व्यवस्था भवत्याधिभौतिकी मुक्तिः। सर्वेशां जीवानां रोगव्याध्यादीनां नाषः मनसः प्रसन्नता तथा निश्कलुशता भवति आधिदैविकी मुक्तिः। आत्मनः स्वस्वरुपावस्थानमाध्यात्मिकी मुक्तिः। त्रिविधेयं मुक्तिः काव्यसाधनया वा प्राप्ता भवति।

न धनाय न पुण्याय व्यवहाराय नापि वा। न च सद्यः सुखार्थाय काव्यं निर्मात्ययं कविः।।

वस्तुतस्तस्य कमैतत् संस्कारोत्थं स्वभावजम्।
यदकृत्वा क्षणं यावन्नासौ षमधिगच्छतिं।। [12]

मुक्तिस्तस्य प्रयोजनम्। सृश्टेष्चेतनायास्त्रैविध्येन सा त्रिधा त्रिधा। अनुशक्तत्वं चासाम्। मुक्तिष्चावरणमङ्गः। आवरणं च सङ्कुचितप्रमातृत्वम्। प्रमाता च कविःसह्रदयष्च। तदीयचैतन्यसङकांचः सङ्कुचित्वम्।

प्रो राजेन्द्रमिश्रमहोदयेन प्रतिपादितं यत् काव्यरचना कवेः सवाभाविकं नैसर्गिकं वा कर्म। जन्मजन्मान्तरदिव्यसंस्कारजनितकर्मणः इदं सत्फलम्।तेनोक्तम्–यषःप्राप्तिरेव काव्यस्य प्रयोजनं भवितुमर्हति यतो यषःइहलोके परलोके चाभिप्रेतं भवति। अनेन यषःप्राप्तिः व्यवहारिकदृश्ट्या काव्यस्यैकमात्रं प्रयोजनं तथा पारमार्थिकदृश्ट्या स्वाभाविकं कर्म इति प्रतिपादितम्–

काव्यमेत्ततो मन्ये कविकर्मस्वभावजम्।
जन्मजन्मान्तरावाप्तदिव्यसंस्कारसत्फलम।।
यन्निसर्गाद्वर्हिभूतं तद्भवेत्सप्रयोजनम।
निसर्गे क्व पुनस्तस्य चर्चाऽनास्थाविवर्धिनी।। [13]

आचार्यरहसविहारीद्विवेदिमहोदयेन आधुनिकपरिप्रेक्ष्यमभिलक्षीकृत्य काव्यस्य प्रयोजनं प्रतिपादितम्। असन्मार्गं परित्यज्य सन्मार्गगमनं कविकीर्तिः स्वान्तःसुखं प्राक्कथावस्तुसंस्कारः सज्जनानां चरितस्योद्घाटनं नव्यकाव्यविधायाः उन्मेशः विकृतिसूचकव्यङ्योक्तिः युगौचित्यं राश्ट्रभक्तिः पर्यावरणविशये चैतन्यं राश्ट्रस्वान्त्र्यवीराणां चरितस्यज्ञानं ईष्वराराधनमित्यादीनि काव्यप्रयोजनरुपेण तेन प्रतिपादितानि–

असन्तं मार्गमुत्सृज्य सन्तं गमयितुं जनम्।
ह्रदाह्लादिकया वाचा प्रज्ञावान् काव्यमङ्ते।
कविकीर्ति पुरस्कार–स्वान्तःसुखसमीहया।। [14]

सुधाकरषुक्लस्यरचिते विंषतिसर्गात्मके गान्धीसौगन्धिके महाकाव्ये क्रियाणां लिट्लकारप्रयोगस्य बाहुल्यं द्रश्टव्यम्–

बभौ नभो भू षुषुभे दिदीपिरे दिषोऽजरायामजिराणि रेजिरे।
ललाल लक्ष्मीरतलस्य चैवं चराचरे चारुरुचष्चकाषिरे।। [15]

सुधाकरविरचितस्य भारतीस्वयंवरस्य महाकाव्स्यस्य वैषिश्ट्यमस्ति यत् समस्तषास्त्रीयलक्षणयुंक्तमिदममहाकाव्यम्।प्रसादगुणमस्याः पदावल्याः लालित्यमत्यन्तं ह्रदयावर्जकमस्ति। यथा–

सा सागरस्य गरिमा त्वरिमा रमस्य
मायामयस्य महिमा च हिमालयस्य।
माधुर्यभृन्मधुरिमा मधुसूदनस्य
सोमस्य भा च सुशमा कुसुमाकरस्य।।[16]

प्रो मिथिलाप्रसादत्रिपाठीमहोदयस्य भार्गवीयमहाकाव्यम् रचनारीत्या रघुवंषमनुकरोमति। अत्र विकीर्णानां भृगुवंषकथनमेकत्र मेलनं परमरुचिकरम्। पुरातनमपीतिवृत्तं कविप्रतिभोल्लिखितत्वेन नूतनत्वं बिभर्ति। स्वस्य समाजस्य देषस्य विष्वस्य चाभ्युदये कोपोऽपि परमावष्यकः।रेणुकायां वयभिचारमाषङ्य कुपितो जमदग्निः चतुरः पुत्रान् रेणुकायाः षिरष्छेत्तमादिषति तैरकरणे तान् निहन्ति च। यदा परषुरामेण जननीषिरष्छित्वा जमदग्निः प्रसादितस्तदाऽसौ कोपं सकलानर्थकं मत्वा परित्यजति। ततः कोपस्तं सवं त्यक्तुं नादिषति।

एतत्प्रसंगे जमदग्निकोपसंवादः कविना स्वपगतिभया कल्पितः स रुचिकाः संवाद एवं वर्तते–
मुनिकृतामवलोक्य च तर्जनां सपदि कोप उवाच भृगूद्वहम्।
श्रृणु न कोऽपि च कोपविवर्जितो भवति देहधरो भुचनत्रये।[17]
भार्गवीयमहाकाव्ये परषुरामस्य वचने राश्ट्रसेवा परमोधर्म इति सामान्यभूतं वस्तु ध्वन्यते। जमदग्निकोपसंवादे कोपोऽपि क्वचित् परमावष्यक इति वस्तु ध्वन्यते।–स्वदेष सेवार्थमिदं षरीरं गृहं च वस्तुति यदा जनानाम्।

भवन्ति राश्ट्रस्य समृद्धिरिश्टा तदाभविश्यत्यभिवर्द्धमाना।[18]
भार्गवीयमहाकाव्ये अलंकारध्वनि अधोलिखितपद्ये दृष्यते–

ब्रह्माण्यतो हरिपदं परिपदं परिलभ्यं लोके; यो राजसंसदि विभज्य पिनाकमुग्रम्।
सीतां श्रियं च निजचापमवाप भक्त्या; रामस्तुतः स षरणं मम रामचंद्रः।।
अत्र चतुर्थपादे रामस्तुत इति पदे रामषब्दस्य दाषरथिरुपार्थग्रहणे विरोधः यतो हि दाषरथिरुपो रामचन्दो दाषरथिनैव स्तुतो नभवति किन्तु रामस्तुत इति पदस्थरामषब्दस्य परषुरामरुपार्थकरणे विरोधपरिहारः।
विष्वनाथमते करुणविप्रसम्भोऽपि श्रृङ्गारस्य भेदः तन्मते यूनोरन्यतरस्मिन् लोकान्तरं गतवत्यन्यतरस्य विमनायमानते पुनरुभयोः संयोगे च सति करुणविप्रलम्भः स्वीक्रियते।[19] सर्पदंषेन प्रमदवरायां मृतायां प्रमदवराविशयः रुरुवियोग एवं वर्णितः– सपदि ललितषीलां वीक्ष्य तां प्राणहीनां, रुरुरतिकरुणाभिः पीडितोऽभूद् द्विजानाम्[20]। अधोलिखिते ष्लोके परषुरामस्य हतं जमदग्निमृद्दिष्य रेणुकां प्रेत कथने करुणो द्रश्टुं ष्यक्यते– वधादषेशभूभुजाममर्शषान्तिरिच्छता नलप्स्यते न चाप्तिरद्य में पितुर्भविश्यति।[21] जालनिबद्धानां मत्स्यानां प्राणान् रक्षितुं चयवनः सवप्राणानपि त्यक्तमुद्यतो भवति। अधोलिखितेष्लोकेदयावीरस्य ध्वनिः–

निशादजालान्तरितः कदाचिद् मुनिष्च मीनैः सह बन्धनेऽभूद्।
क्षमापयन् ते प्रणताष्च बुद्धवा न मोक्षमिच्छत्यथ भार्गवोऽसौ।।[22]

पं गिरिजाषंकरषास्त्रिकृत् प्रसन्नभारतमहाकाव्ये अश्टमे सर्गे आर्याछन्दसा कविना दुर्दान्तस्य नृषंसस्य सिकन्दरस्य आक्रमणजन्यायाः महाभीतेः प्रभावः संक्षिप्ताभिः षेभनाभिर्भङगीभवतिर्भिवर्ण्तिः–

मूकीभूता वीणा विश्रान्तो मञ्जुनूपुरध्वानः।
देषव्यथानुभूत्या भेरीस्पर्षोऽपि वर्ज्योऽभूत्।।[23]

विद्वद्वरेण्यरमाकान्तोपाध्याायकृत् श्रीदयानन्दचरितमहाकाव्यस्य प्रकाषनं एकविंषतके संस्कृतजगतः कापि अनन्यसामान्या स्वागतार्हा घटनेति। काव्यसौन्दर्यदृषा अस्मिन् महाकाव्ये भाविकोऽलङ्कारः भूयसा भव्यात्मना भावकेन कविना कृतः। भाविका– ऽलङ्कारेण भूतभव्यवर्तमानगताः पदार्थाःकरतलगतामलककल्पाःसाक्षात्क्रियन्ते। दयानन्दस्य दृश्टस्य युगस्य साक्षात्कारं महाकविः इत्थं भणति– क्वचित्त तु बाबूध्वनिरेश श्रूयते क्वचिच्च बाबेति कटुश्रुतः स्वरः।

विलोक्यते क्वापि न भारतीयता न राश्ट्रभक्तिः परिवीक्ष्यतेऽधुना।।[24]
पुरौ नरीनर्ति षिरोनु भावनी सदा चरीकर्ति बिभर्त्यपावनी।
अवैदिकाचारविचारयामिनी विगर्हितेयं कलहप्रवर्धिनी।।[25]
अर्थान्तरन्यासालङ्कारोऽपि महाकाव्येऽस्मिन वस्तुतत्त्वान्वेशणं दृढयति। दयानन्दस्य दृढता अर्थान्तरन्यासद्वारेण सम्यगुक्तम्–

रुरुधिरे रुधिराप्लतरोधकाः
प्रतिपदं मदमानुशमत्कुणाः।
न हि तथापि च तस्य गतिर्हता
न तृणमर्हति षैलषिलातुलाम्।।[26]

अत्र मदमानुशमत्कुणा इति पदेन मदमदनुश एव मत्कुण इति रुपकम् मकारावृत्त्या चानुप्रास इत्युभयोः संसृश्ट्या किमपि सौन्दर्यं निर्मियते। उत्तरार्धे च विषेशस्य सामान्येन समर्थनादर्थान्तरन्यासालङ्कार। बच्चूलालोऽवस्थिवर्यस्य गजलेशु "इतस्तानस्ततो वानम्" भावसान्द्रता निर्दुश्टबन्धाष्च मनो हरन्ति अपि च"किं ब्रूयाम्" इत्यस्य पदम्– मनुस्यस्यान्तरो व्याधिर्बहिभेशज्यविज्ञानम्

पटः किं तन्तुभिःसिद्ध्येदितस्तानस्ततो वानम्।
बहिर्द्वन्द्वेशु विभ्रन्ते कुतस्त्यो विभ्रमावेषः
मनस्याया ऋते मुग्धे मुधा तेऽपाङ्गसन्धानम्।।[27]
मनुश्यैः ष्वापदानां भक्षणं भक्षितं सर्वम्
इदानीं ते मनुश्यानेव चेचर्वन्ति किं ब्रूयाम्।

भुजङ्गप्रयाते भुजङ्गप्रयातेनैव छन्दसा इच्छाराम द्विवेदी महोदयस्य लालित्यं द्रश्टव्यम्–

सखे लज्जितं वीक्ष्य नूनं गतिं ते भुजङ्गपगयाणं भुजङ्गप्रयातम्।
कियत्कौषलं लोकसेवाविधे ते गतौ में न यातं मतौ में न यातम्।।[28]
नैतिकमूल्यानां ह्रासविशये रामकरणषर्माणः "भवाम्यहं निरुत्तरः"इति षीर्शकेण रमणीयरचना द्रश्टव्या–

न भुज्यते न पच्यते न पीयते न धीयते
न चर्व्यते न चश्यते न चुम्ब्यते न सूयते।
न सेव्यते न सीव्यते तथापि कांचनं कथम्

समाकृश्णोन्मनोः सुतं भवाम्यहं निरुत्तर।।
आचार्यराधावल्लभत्रिपाठिवर्याणां प्रेक्षणकेशु समसामयिकदसासु सामाजिकविसंगतयस्तु विश्षेशरुपेण चित्रिताः परिलक्ष्यन्ते।भौतिक– तावादेऽस्मिन्युगे धनलोलुपतायाः यौतुकप्रथायाः यद् हिंसाभिमुखित्वं संवेदनाराहित्यंच सर्वथा द्रुतं प्रसरणषीले। तदेतद्दर्षं दर्षं नाट्यकारौऽसौ दूयते स्वचेतसि–

क्षणे क्षणे प्रवर्धते धनाय हिंस्रता खरै–
विलोप्यतेऽतिनिर्दयं च जन्तुभिर्मनुश्यता।
विभाजितं जगद् द्विधा मिहन्यते च घातकै
रतीव दैन्यमागतास्ति साधुता मनुश्यता।।[29]

विंषतके एकविंषतके च संस्कृतसाहित्ये महाकाव्य–नाटक–गजल–गीतिकाव्य–पत्रपत्रिका–यात्रावृत्तान्त–काव्यषास्त्र लेखन प्रभृतिशु रसगुणालंकाररीतिभाशाषैलीविशयवस्तुमाध्यमेन ललितकलायाः दर्षनं भवति नास्त्यत्र षंका।

**संदर्भ**


1. पणिनीय धातुपाठ 1/428
2. पाणिनीयधातुपाठ 10/1648
3. नाट्यषास्त्रम् 1/117
4. काव्यालंकार
5. काव्यादर्ष
6. मालविकाग्निमित्रम् 2/3
7. षुक्रनीति 4/3/25
8. काव्यालंकारकारिका तृतीयाधिकरण
9. काव्यसत्यालोक पंचमोद्योत
10. काव्यतत्त्वविवेक

11. अभिनवकाव्यषास्त्रम् द्वितीय आयाम
12. अभिनवकाव्यालंकारसूत्रप्रथमाधिकरणद्वितीयोऽध्यायनव्यकाव्यतत्त्व विमर्ष
13. अभिराजयषोभूशणप्रथोन्मेशकाव्यप्रयोजनप्रकरण
14. नव्यकाव्यतत्त्वविमर्ष
15. गान्धीसौगधिकम्
16. भारतीस्वयंवरम्
17. भार्गवीयम्‌ा 16/48–50द्ध
18. भार्गवीयम् 8/56
19. साहित्यदर्पण 3/214
20. भार्गवीयम् 5/21
21. भार्गवीयम् 21/26
22. भार्गवीयम् 4/6
23. प्रसन्नभारतम् 8/3
24. श्रीदयानन्दचरितम् 3/78
25. श्रीदयानन्दचरितम् 3/81
26. श्रीदयानन्दचरितम् 8/56
27. दूर्वा7 16 पृ 14
28. दूर्वा 23 पृ 32
29. पेक्षणक सोमप्रभ पृ 11